**रग** स्वादे आप्तौ च चु० उभ० सक० सेट् । रागयति अरीरगत् त । [अररङ्घत् त ।

**रघ** दीप्तौ चु० उभ० सक० सेट् इदित् । रङ्घयति ते

**रघ** गतौ भ्वा० आ० सक० सेट् इदित् । रङ्घते अरङ्घिष्ट ।

**रघु** पु० लघ–उ लस्य रत्वम् । सूर्य्यवंश्ये दिलीपसूनौ १नृपतिभेदे रघोरपत्यमण् बहुषु लुक् । रघुवंश्येषु अजप्रभृतिषु २क्षत्रियेषु ब०व० । तान् अधिकृत्य कृतो ग्रन्थः अण् आख्यायिकायां तस्य लुक् । कालिदासप्रणीते ऊनविंशतिसर्गात्मके महाकाव्यभेदे पु० ।

**रघुनन्दन** पु० रघून् नन्दयति नन्द–णिच् ल्यु । दशरथस्य ज्येष्ठपुत्रे १श्रीरामे त्रिका० २भरतादौ च ।

**रघुनाथ** पु० रघूणां नाथः रक्षकत्वात् श्रेष्ठत्वाद्वा । श्रीरामे शब्दर० । रघुपत्यादयोऽप्यत्र ।

**रघुवंश** पु० ६त० । रघुकुले । तमधिकृत्य कृतो ग्रन्थः आख्यायिकायां तस्य लुक् । कालिदासप्रणीते ऊनविंशतिसर्गात्मके महाकाव्यभेदे पु० । [पुत्रे श्रीरामे ।

**रघुवंशतिलक** पु० रघुवंशे तिलक इव । दशरथनृपस्य ज्येष्ठ-

**रघुवर** पु० रघुषु वरः श्रेष्ठः । श्रीरामे ।

**रघूद्वह** पु० रघुषु उद्वहः रक्षादिभारधारकः उद्+वह–अच् । दशरथनृपस्य ज्येष्ठपुत्रे श्रीरामे शब्दर० ।

**रङ्क** त्रि० रकि–अच् । १कृपणे २मन्दे च मेदि० । [राजनि०

**रङ्कु** पु० रकि–उ । १मृगविशेषे अमरः । २शबलपृष्ठे मृगे

**रङ्ग** पुं न० रगि–अच् । १धातुभेदे (राङ) राजनि० । रन्ज–भावे घञ् । २रागे । आधारे घञ् । ३रणभूमौ ५नाट्यस्थाने च अमरः । करणे घञ् । ४नृत्ये मेदि० । ६टङ्कणे (सोहागा) ७खादिरसारे च राजनि० । रङ्गधातोः शो"धनप्रकारो भावप्र० उक्तो यथा "र(व)ङ्गनागौ प्रतप्तौ च गलितौ तौ निषेचयेत् । त्रिधा त्रिधा विशुद्धिः स्यादृवि दुग्धेऽपि च त्रिधा" । तैलतक्रकाञ्जिकगोमूत्रकुलत्थक्वाथेषु प्रत्येकं त्रिधा त्रिधा । अथ रङ्गस्य मारणविधिः । "मृत्पात्रे द्राविते र(व)ङ्गे चिञ्चाश्वत्थत्वचोरजः । चित्वा र(व)ङ्गचतुर्थांशमयोदर्व्या प्रचालयेत्" । चिञ्चा(अमिली) रजश्चूर्णम् । अयोदर्वी (करछुली) । "ततोद्वियाममात्रेण र(व)ङ्गं भस्म प्रजायते । अथ भस्मसमं तालं क्षिप्त्वाम्लेन विमर्दयेत् । ततो गजपुटे पक्त्वा पुनरम्लेन मर्दयेत् । तालेन दशमांशेन याममेकं ततः पुटेत् । एवं दशपुटैः पक्वं र(व)ङ्गं भवति मारितम् । एवं मारितस्य र(व)ङ्गस्य गुणाः । "रङ्गं लघु सरं रूक्षं कुष्ठमेहकफक्रिमीन् । निहन्ति पाण्डुं सश्वासं नेत्र्यमीषत्तु पित्तलम् । सिंहो गजौघन्तु यथा निहन्ति तथैव र(व)ङ्गोऽखिलमेहवर्गम् । देहस्य सौख्यं प्रबलेन्द्रियत्वं नरस्य पुष्टिं विदधाति नूनम्" । तस्याशुद्धस्य दोषमाह "रङ्गो विधत्ते खलु शुद्धिहीनस्तथा ह्यपक्वश्च किलासगुल्मौ । कुष्ठानिमूलं किल वातशोथं पाण्डुं प्रमेहञ्च भगन्दरञ्च । विषोपमं रक्तविकारवृन्दं जमश्च कृच्छ्राणि कफज्वरञ्च । मेहाश्मरीविद्रधिमुख्यरोगान्नानापि कुर्य्यात् कथितान् विकारान्" तद्भेदो यथा । "श्वेतं मृदु लघु स्वच्छं स्निग्धमुष्णसहं हिमम् । सूत्रपत्त्रकरं कान्तं त्रपु श्रेष्ठमुदाहृतम् । खुरकं मिश्रकञ्चापि द्विविधं र(व)ङ्गमुच्यते । उत्तमं खुरकं तत्र मिश्रकं त्वहितं मतम्" । राजनि० ।

**रङ्गज** न० रङ्गात् रङ्गधातोर्जायते जन–ड । सिन्दूरे रत्नमा०

**रङ्गजीवक** पु० रङ्गेण रञ्जनेन जीवति जीव–ण्वुल् । (रङ्गरेज) १शिल्पिभेदे चित्रकरे शब्दर० । २नाट्यजीविनि च

**रङ्गद** पु० रङ्गं रञ्जनं रागं ददाति दा–क । १टङ्कणे २खदिरसारे च ३स्फटिर्यां स्त्री राजनि० ।

**रङ्गदायक** पु० रङ्गं ददाति दा–ण्वुल् । १कङ्कुष्ठे (काङ्कुनी) २धान्यभेदे राजनि० ।

**रङ्गपत्त्री** स्त्री रङ्गाय पत्त्रमस्याः ङीप् । नीलीवृक्षे राजनि० तत्पत्त्ररसादिना हि नीलरागसम्भवः । [वृक्षे राजनि० ।

**रङ्गपुष्पी** स्त्री रङ्गं पुष्पमस्ति पुष्प अण् गौरा० ङीष् । नीली०

**रङ्गभूमि** स्त्री रज्यतेऽत्र रन्ज–आधारे घञ् कर्म० । १नाट्यभूमौ शब्दर० । "रङ्गभूमिं समासाद्य" इति भा० ६प० । २मल्लभूमौ च ।

**रङ्गमातृ** स्त्री रङ्गस्य रागस्य मातेवोत्पादिका । १लाक्षायाम् २कुट्टिन्याञ्च मेदि० । सा हि नायकयोर्वार्त्ताहरणादिद्वारा रागं वर्द्धयति ।

**रङ्गलासिनी** स्त्री रङ्गं रागं लासयत्युल्लासयति वृन्तरसेन लस–णिच्–णिनि । शेफालिकायाम् शब्दच० ।

**रङ्ग(बी)वीज** न० रङ्गं वी(बी)जमुत्पत्तिसाधनं यस्य । रजते शब्दर० । कृत्रिमरूप्यस्य पारदयोगात् रङ्गजन्म रजतशब्दे दृश्यम् ।

**रङ्गशाला** स्त्री ६त० । (नाचघर) नाट्यगृहे शब्दर० ।

**रङ्गाजीव** पु० रङ्गं रञ्जनं नाट्यस्थानं वा आजीवति आ+जीव–अण् । (रङरेज) १शिल्पिभेदे चित्रकरे अमरः । २नटे च हेमच० ।